# Shri Svamini Stotram

# श्रीस्वामिनीस्तोत्रम्

## Document Information

Text title : Svamini Stotram

File name : svAminIstotram.itx

Category : devii, radha, viThThaleshvara, puShTimArgIya

Location : doc_devii

Author : Viththaleshvara

Proofread by : Mohan Chettoor, NA

Description/comments : puShTimArgIya

Latest update : June 21, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 21, 2022

*sanskritdocuments.org*

Shri Svamini Stotram

# श्रीस्वामिनीस्तोत्रम्

यदैव श्रीराधे! रहसि मिलति त्वां मधुपतिः
तदैवाकार्याऽहं निजचरणदास्ये निगदिता ।
मुदा चन्द्रावल्या शशिमुखि ! कृतार्थास्मि भवति
तथा सम्पन्ने मां स्मरसि यदि सम्प्रेषणविधौ ॥ १॥

कदाचित् कालिन्द्यामहनि तरलापाङ्गरुचिरा
समाप्लुत्याकण्ठं किमपि परिधायाशुवसनम् ।
स्मरेन् मां चेदुत्तारितवसनसङ्क्षालनविधौ
कृतार्थाऽहं भूयान्निजचरणदासीति भवति ॥ २॥

तमिस्रायामश्रावितचरणमञ्जीरनिनदा
कथञ्चित् सम्प्राप्ता प्रियतमनिकुञ्जं चरणयोः ।
मुदा तल्पारोहे कमलमुखि ! सम्मार्जनविधौ
कृतार्थैवाहं चेत् स्मरति भवती मां सकृदपि ॥ ३॥

विविधबन्धरतिश्रमसीकराकुल-
कपोलमुदीक्ष्य हरिं यदि ।
स्मरसि मां व्यजनार्थमपि क्षणं
सुमुखि धन्यतमास्मि तदा ह्यहम् ॥ ४॥

यदि स्नानव्याजात् तरणितनयातीरमहनि
प्रयातुं प्राणेशोचितविविधवस्तूनि सुमुखि ।
गृहीत्वा गुप्तानि स्मरसि परिधेयं स्ववसनं
ग्रहीतुं मां स्वामिन्यहमिह कृतार्थैव हि तदा ॥ ५॥

कुतूहलाभिनिवेशतः प्रियेण पाणिकर्षणाद्- (कुतूहलैकशीलतः)
इतस्ततो विपाटितां स्वकञ्चुकीमतिप्रियाम् ।
प्रदातुमुन्नताङ्गि मां सकृद्यदि स्मरस्यहो-
तदा मुदास्मि राधिके! कृतार्थतापदङ्गता ॥ ६॥

चारुप्रसूनमयतल्पगता स्वनाथे
    ताम्बूलचर्वितमुदारमुखाम्बुजस्थम् ।
दातुं स्थिते निजमुखाब्जगतं प्रदातुं
    मां चेत् स्मरस्यनुचरीं क्व तदा नु मामि ॥ ७॥

निकुञ्जे पुष्पालीरचितशयनात् केलिजनित
    श्रमाम्भः सङ्क्रान्ताननकमलशोभाहृतमनाः ।
समुत्थायायान्ती सहजकृपया केलिदलितां
    स्रजं दातुं राधे ! स्मरसि यदि मां त्वं किमपरैः ॥ ८॥

यदा चलसि मार्गता शयनतापि शेषे मुदा
    पदाम्बुजमलङ्करोष्यमलकुङ्कुमं त्वं तदा ।
मुहुः सुमुखि राधिके ! किमधिकं नु सम्प्रार्थये
    सदा भवतु मे भवच्चरणपङ्कजारक्तता ॥ ९॥

प्रियतमकरपद्मस्पर्शभावेक्षणोद्यद्-
    रसभरजवरासामन्दमोदाकुलानाम् ।
प्रतिपदतलरुग्भिर्गोपसीमन्तिनीना-
    मरुणतरहृदम्भोजन्मने मे नमोऽस्तु ॥ १०॥

यावन्ति पदपद्मानि भवतीनां हरिप्रियाः ।
    तावद्रूपः सदा दास्यं करवाणि तदा तदा ॥ ११॥

गेहात् निकुञ्जं निशि सङ्गतायाः
    प्रियेण तल्पे विनिवेशितायाः ।
स्वकेशवृन्दैस्तवपादपङ्कजे
    सम्मार्जयिष्यामि मुदा कदा नु ॥ १२॥

इति श्रीविठ्ठलेश्वरविरचितं श्रीस्वामिनीस्तोत्रं समाप्तम् ।

Proofread by Mohan Chettoor

*Shri Svamini Stotram*

pdf was typeset on June 21, 2022

Please send corrections to *sanskrit@cheerful.com*